# હરિવરાસનં વિશ્વમોહનમ

હરિવરાસનં વિશ્વમોહનમ
હરિદધીશ્વરં આરાધ્યપાદુકમ
અરિવિમર્દનં નિત્યનર્તનમ
હરિહરાત્મજં દેવમાશ્રયે
શરણં અય્યપ્પા સ્વામી શરણં અય્યપ્પા
શરણં અય્યપ્પા સ્વામી શરણં અય્યપ્પા ॥ 1 ॥

શરણકીર્તનં ભક્તમાનસમ
ભરણલોલુપં નર્તનાલસમ
અરુણભાસુરં ભૂતનાયકમ
હરિહરાત્મજં દેવમાશ્રયે
શરણં અય્યપ્પા સ્વામી શરણં અય્યપ્પા
શરણં અય્યપ્પા સ્વામી શરણં અય્યપ્પા ॥ 2 ॥

પ્રણયસત્યકં પ્રાણનાયકમ
પ્રણતકલ્પકં સુપ્રભાંજિતમ
પ્રણવમંદિરં કીર્તનપ્રિયમ
હરિહરાત્મજં દેવમાશ્રયે
શરણં અય્યપ્પા સ્વામી શરણં અય્યપ્પા
શરણં અય્યપ્પા સ્વામી શરણં અય્યપ્પા ॥ 3 ॥

તુરગવાહનં સુંદરાનનમ
વરગદાયુધં વેદવર્ણિતમ
ગુરુકૃપાકરં કીર્તનપ્રિયમ
હરિહરાત્મજં દેવમાશ્રયે
શરણં અય્યપ્પા સ્વામી શરણં અય્યપ્પા
શરણં અય્યપ્પા સ્વામી શરણં અય્યપ્પા ॥ 4 ॥

ત્રિભુવનાર્ચિતં દેવતાત્મકમ
ત્રિનયનં પ્રભું દિવ્યદેશિકમ
ત્રિદશપૂજિતં ચિંતિતપ્રદમ
હરિહરાત્મજં દેવમાશ્રયે
શરણં અય્યપ્પા સ્વામી શરણં અય્યપ્પા
શરણં અય્યપ્પા સ્વામી શરણં અય્યપ્પા ॥ 5 ॥

ભવભયાપહં ભાવુકાવહમ
ભુવનમોહનં ભૂતિભૂષણમ
ધવળવાહનં દિવ્યવારણમ
હરિહરાત્મજં દેવમાશ્રયે
શરણં અય્યપ્પા સ્વામી શરણં અય્યપ્પા
શરણં અય્યપ્પા સ્વામી શરણં અય્યપ્પા ॥ 6 ॥

કલમૃદુસ્મિતં સુંદરાનનમ
કલભકોમલં ગાત્રમોહનમ
કલભકેસરિ વાજિવાહનમ
હરિહરાત્મજં દેવમાશ્રયે
શરણં અય્યપ્પા સ્વામી શરણં અય્યપ્પા
શરણં અય્યપ્પા સ્વામી શરણં અય્યપ્પા ॥ 7 ॥

શ્રિતજનપ્રિયં ચિંતિતપ્રદમ
શ્રુતિવિભૂષણં સાધુજીવનમ
શ્રુતિમનોહરં ગીતલાલસમ
હરિહરાત્મજં દેવમાશ્રયે
શરણં અય્યપ્પા સ્વામી શરણં અય્યપ્પા
શરણં અય્યપ્પા સ્વામી શરણં અય્યપ્પા ॥ 8 ॥